# चण्डी करावलम्ब स्तोत्रम् - विजयनाम संवत्सर शरन्नवरात्रिषु

हे शैलपुत्रि शिवशङ्करिशम्भुराज्ञि
श्रीकार्तिकेय गणनायक मात्रृदेवि
नारायणेन मधुकैटभ मारकर्त्रि
मातङ्गि चण्डि मम देहि करावलम्बम् । १

श्रीकालि दिव्यचरणौ शरणं प्रपद्ये
ब्रह्मादि सर्वसुरसेवित दिव्यमूर्ते
संदर्पयुक्त  महिषासुरनाशकर्त्रि
मातङ्गि चण्डि मम देहि करावलम्बम् । २

कन्दर्पमुख्य नतभक्त सुसेविताङ्घ्रे
अत्र्यादि सर्वमुनिवन्दित दिव्यकीर्ते
हुंकारमात्र कृतभञ्जन धूम्रनेत्रं
मातङ्गि चण्डि मम देहि करावलम्बम् । ३

सिंहेन्द्रमध्यम सुशोभित सुन्दराङ्गि
इन्द्रादि सर्व दिशपालक वन्दिताङ्घ्रे
सङ्ख्ये प्रवृत्त परिभञ्जन चण्डमुण्डौ
मातङ्गि चण्डि मम देहि करावलम्बम् । ४

चक्राब्जशङ्खहलपुस्तकखड्गमाला
घण्टादिशूलधनुधारिणि दिव्यगात्रि
संरक्तबीज खलदानव सम्प्रहार्त्रि
मातङ्गि चण्डि मम देहि करावलम्बम् । ५

मातङ्गमौनितनये सित पद्मनेत्रि
मातङ्गवैरि घनवाहनि शूलपाणि
शुम्भादि राक्षस विदारिणि पाहि पाहि
मातङ्गि चण्डि मम देहि करावलम्बम् । ६

येमानवाः स्थिरमिदं प्रपठन्तिसाराः
ते निश्चयेन महतीं सुखमाप्नुवन्ति
तस्माद्करोतु मम मानस दर्शकत्वं
मातङ्गि चण्डि मम देहि करावलम्बम् । ७